Study materials for Sanskrit GE-4 students, Sem-IV

Short Notes from अच्सन्धिप्रकरणम्

**उपदेश** - उपदेश आद्योच्चारणम्। ऋषीणाम् वैयाकरणानामिति शेषः। एतेन धातु-प्रातिपदिक-निपात-प्रत्याहार-सूत्र-प्रत्यय-आदेश-आगम-इत्यादयः गम्यन्ते।

**वृद्धि** - अत्र पाणिनिसूत्रम् वृद्धिरादैच् इति। आदैच् च वृद्धिसंज्ञः स्यात्। आत् च ऐच् चेति द्वन्द्वसमासः। आत् इत्यत्र तपरकरणं नियमार्थम्। ऐच् इह द्विमात्र एव, तात्परत्वात्। तेन कृष्ण एकत्वम् इत्यत्र कृष्णैकत्वमिति द्विमात्र ऐच् भवति। एवं गङ्गौघः, देवैश्वर्यम्, कृष्णौत्कण्ठम् इत्यादयः अपि निष्पद्यन्ते। वृद्धिप्रदेशाः तु वृद्धिरेचि इति।

**गुण** - अत्र पाणिनिसूत्रम् अदेङ् गुण इति। अत् च एङ् च गुणसंज्ञः स्यात्। अत्र समाहारद्वन्द्वसमासः। तपरकरणमिह सर्वार्थम्। तेन गङ्गा उदकमिति स्थिते गङ्गोदकमिति द्विमात्र एव भवति। एवं उपेन्द्रः, रमेशः, कृष्णर्द्धिः, तवल्कार इत्यादयः अपि निष्पद्यन्ते। गुणप्रदेशाः तु आद्गुण इति।

**धातु** - अत्र पाणिनिसूत्रम् भूवादयो धातवः। क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः। भूश्च वाश्च भूवौ, आदिश्च आदिश्च आदी। प्रथम-आदिशव्दः प्रभृतिवचनः, द्वितीयस्तु प्रकारवचनः। भूप्रभृतयो वासदृशाश्च ये ते धातुसंज्ञकाः स्युः। क्रियावाचिन इति किम्, याः पश्यन्ति इत्यत्र या इत्यस्य धातुत्वं मा भूत्। भ्वादयः किम्, वर्जनक्रियावाचिनो हिरुक् इत्यस्य धातुत्वं मा भूत्।

**टि** - अत्र पाणिनिसूत्रम् अचोऽन्त्यादि टि इति। अचां मध्ये योऽन्तः तत् टिसंज्ञः स्यात्। तच्च टेः पररूपं भवति शकन्ध्वादिषु पररूपं वाच्यमिति वार्तिकेन। अतः शक अन्धु इति स्थिते सवर्णदीर्घे प्राप्ते अनेन पररूपं स्यात्। एवं मनस् ईषा, पतत् अञ्जलि इत्यादौ अपि टेः स्थाने पररूपं कृत्वा मनीषा इति, पतञ्जलि इति च रूपं भवति।

**उपसर्ग** - उपसर्गाः क्रियायोगे। क्रियायोगाद् प्रादयो निपाता उपसर्गसंज्ञां लभन्ते। यथा प्रणमति, परिषिञ्चति। उपसर्गयोगात् अकर्मकाणामपि धातूनां सकर्मकत्वं भवति। उपसर्गेण धात्वर्थो वलादन्यत्र नीयते, प्रहार-आहार-संहार-विहार-परिहारवत्। कश्चिद् उपसर्गः धात्वर्थं वाधते (गच्छति आगच्छति यथा), कश्चिद् उपसर्गः धात्वर्थम् अनुवर्तते (वहति प्रवहति यथा), कश्चित् पुनः धात्वर्थम् विशिनष्टि (नमति प्रणमति यथा)।

# Explanation in Sanskrit

**अकः सवर्णे दीर्घः** - सूत्रमिदम् लघुसिद्धान्तकौमुदीग्रन्थे अच्सन्धिप्रकरणे पठितम्। इको यणचि इति सूत्रात् अचि इति पदमनुवर्तते। अच् इति सूत्रेण स्वरवर्णाः, अक् इति सूत्रेण च अ-इ-उ-ऋ-ऌ- इत्येताः वर्णाः गृहीताः। अतः सवर्णे अचि परे अकः दीर्घ एकादेशः स्यादिति फलितार्थः। एवं दैत्य अरि इति स्थिते संहितायां विषये द्वयोरकारयो स्थाने एकः दीर्घ आकारो भवति स्थानसाम्यात् (दैत्यारि इति)। श्री ईश इति स्थिते ईकारयो एकः दीर्घ ईकारो भवति (श्रीश इति), विष्णु उदय इत्यत्र उकारयो ऊकारश्च (विष्णूदय इति)।

**इको यणचि** - सूत्रमिदम् लघुसिद्धान्तकौमुदीग्रन्थे अच्सन्धिप्रकरणे पठितम्। इकः(इ-उ-ऋ-ऌ) स्थाने यण् (य-व-र-ल) स्याद् अचि परे संहितायां विषये। अच् इति सूत्रेण स्वरवर्णाः गृहीताः। अतः इकारस्थाने यकारः, उकारस्थाने वकारः, ऋकारस्थाने रकारः, ऌकारस्थाने च लकारो भवति स्थानत आन्तर्यात्। तथा हि, दधि अत्र > दध्यत्र, मधु ऋते > मध्वृते, पितृ अनुमति > पित्रनुमति, ऌ आकृति > लाकृति इत्यादयो निष्पन्नाः। अपि च, अनेन सूत्रेण सुधी उपास्य इति स्थिते सुध् य् उपास्य इति जायते। पश्चात् सुद्ध्युपास्य इति रूपं भवति।

**भूवादयो धातवः** - सूत्रमिदम् लघुसिद्धान्तकौमुदीग्रन्थे अच्सन्धिप्रकरणे पठितम्। धातुसंज्ञाविधायकम् इदं सूत्रम्। क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः इति सूत्रार्थः। भूश्च वाश्च भूवौ, आदिश्च आदिश्च आदी। प्रथम-आदिशव्दः प्रभृतिवचनः, द्वितीयस्तु प्रकारवचनः। भूप्रभृतयो वासदृशाश्च ये ते धातुसंज्ञकाः स्युः। क्रियावाचिन इति किम्, याः पश्यन्ति इत्यत्र या इत्यस्य धातुत्वं मा भूत्। भ्वादयः किम्, वर्जनक्रियावाचिनो हिरुक् इत्यस्य धातुत्वं मा भूत्।

**वृद्धिरादैच्** - सूत्रमिदम् लघुसिद्धान्तकौमुदीग्रन्थे अच्सन्धिप्रकरणे पठितम्। आदैच् च वृद्धिसंज्ञः स्यात् इति सूत्रार्थः। आत् च ऐच् चेति द्वन्द्वसमासः। आत् इत्यत्र तपरकरणं नियमार्थम्। ऐच् इह द्विमात्र एव, तात्परत्वात्। तेन कृष्ण एकत्वम् इत्यत्र कृष्णैकत्वमिति द्विमात्र ऐच् भवति। एवं गङ्गौघः, देवैश्वर्यम्, कृष्णौत्कण्ठम् इत्यादयः अपि निष्पद्यन्ते। वृद्धिप्रदेशाः तु वृद्धिरेचि इति।